स्यतत्तदाकारत्वाभावात् तदभावश्चस्वेऽपिब्रह्मचैतन्येआवरणात् अनावृतेपिशुक्तिरजतादावस्वेऽत्वात्धर्माध
र्मादौलस्वच्छत्वादावृतित्वाद्वातेनस्वेऽथावृतेप्रमाणवत्यातदाकारताअनावृतेयस्वेऽशुक्तिरजतादावविद्यावृत्यात
दाकारताअनावृतेस्वेऽतुसूरवदुःखादौस्वतइतिनांतःकरणसंबंधमात्रेणभानप्रसंगः ननुब्रह्मणः कथमावर
णंनिरवद्यस्वप्रकाशत्वेनसर्वज्ञत्वात् सत्यंस्वसंबंधसर्वभानकृतयासर्वज्ञमपिअंतःकरणावछिन्नजीवाज्ञान
विषयतयाआवृतमितिव्यपदेशात् नसाक्षात्जगदुपादानमितिपक्षेचिदुपरागार्थाआवरणभंगार्थाचवृत्तिःजी
वोपादानत्वपक्षेतुआवरणभंगार्थैवतिनन्वेकेनैवघटादिज्ञाननआवरणस्यभंगनयाद्योमुक्तिप्रसंगःअज्ञानस्ये
कत्वात् नानाज्ञानपक्षेपिरङ्गस्थचित्तस्यैकोपाधित्वात्नउत्तजकमणिरिवदृत्याआवरणस्याभिभवोगीकारात्त
थाचप्रमाणजन्यांतःकरणवृत्यभावसहकृतमज्ञानंसतिभासस्त्यपिवस्तुनिनास्तिनभातीतिप्रतीतिजननसमर्थ
मावरणमित्युच्यतेवृत्तौजातायांत्ववछेदकाभावाद्विद्यमानमप्यविद्यमानसमंतेनतिनस्वकार्यसमर्थज्ञानंतेनाऽभ

भिप्रेतमित्यत्रेतनन्वेवंसतिब्रह्मज्ञानेनाप्यविद्यायाअनिवृत्तेरनिर्मोक्षप्रसंगः ननतत्त्वमस्यादिवाक्यार्थज्ञानाद्
विद्यानिवृत्त्यभ्युपगमात् स्वविषयप्रमात्वेनैवाविद्यानिवर्त्तकत्वात् महावाक्यार्थज्ञानस्यैवअबाधितविषयतया
प्रमात्वात् प्रत्यक्षादीनांतुबाधितविषयतयाभ्रमत्वेपिव्यवहारसामर्थ्येनप्रामाण्याभिमानात् ज्ञानादज्ञाननि
वृत्तेरन्यत्रादर्शनंचासिद्धंस्वानुभवसिद्धत्वात् अन्यथानुपपत्तेतुसर्वतोबलवत्वात् तदुक्तंअन्यथानुप
पत्तिर्ह्यदार्ढ्यप्रसादिकापिनदृष्टिर्विभ्रमंसैवसर्वउपाधिकेति अथवामूलाज्ञानस्यैवअवस्थाज्ञानानिघटादि
विषयावरणानिअज्ञानस्वज्ञानप्रागभावस्थानीयत्वेनयावंतिज्ञानानितावंत्यज्ञानानीत्यभ्युपगमात् एतेनज्ञा
नेनैकाज्ञानस्यैवनाशाद्ब्रह्मादिज्ञानेनआवरणनाशेपिनकदाचिदनुपपत्तेः नन्वनुमानादिभिरावरणंनिवर्त्य
तेनवाआद्यसाक्षात्कारिभ्रमस्यापिसंस्कारःपीनत्वादेःश्वेतत्वाद्यनुमानादिनानिवृत्तिप्रसंगः अधिष्ठानाज्ञा
नोपादानदलेनभ्रमस्यतन्निवृत्तानिवृत्तेःदिङ्मोहादेरनुमानादिनानिवृत्तिप्रसंगःयौक्तिकज्ञाननेनचब्रह्मण्य

विधानिष्ठेसाक्षात्कारार्थंश्रवणमननाद्यपेक्षानस्यात् द्वितीयेवन्ध्यादिव्यवहारोनस्यात्प्रतिबंधकस्यविद्यमा
नत्वात् उच्यतेद्विविधमावरणंकर्मसत्यापादकंअंतःकरणावछिन्नसाक्षिनिष्ठमज्ञानापादकंविषयाव
छिन्नब्रह्मचैतन्यनिष्ठंघटमहंनजानामीत्यनुभवात् तत्राद्यंपरोक्षापरोक्षसाधारणप्रमामात्रेण
निवर्त्ततेअनुमितेपिवन्ध्यादिनास्तीतिप्रतीत्यनुदयात् द्वितीयंतुसाक्षात्कारेणैवनिवर्त्ततेयदाश्रयंयदाका
रंचाज्ञानंतदाश्रयंतदाकारमज्ञानंनाशयतीतिनियमात् परोक्षज्ञानस्यविषयेंद्रियसन्निकर्षाभावेनअंतःकर
णमात्राश्रयत्वात् अपरोक्षज्ञानस्यैवविषयताव्यापारजन्यत्वनविषयांतःकरणोभयजन्यत्वेननतदुभयनिष्ठता
न तदुक्तेपरोक्षज्ञानेतानश्येदसत्वावृत्तिहेतुता अपरोक्षधियानश्येदसत्वावृत्तिहेतुताइति तेनानुमानादाव
सत्वावरणनाशाव्यवहारः अस्मावावरणानिवृत्त्यान्यसापेक्षकसाक्षात्कारित्वमानिवृत्तिरितितस्मान्निर्धर्मकस्याया
त्मनः अविद्यांतःकरणतादात्म्याध्यासानधर्मकर्तृत्वभोक्तृत्वान्यध्यासउपपद्यतेननुत्वन्मतेअनिर्वचनीयाध्या

स्यभ्युपगमात् येकर्तृत्वादयोंतःकरणधर्माःआत्मन्यध्यस्यंतेतिअनिर्वचनीयास्तत्रोत्पद्यंतइतिवाच्यं तथाचव्याव
हारिकप्रातीतिकभेदेनकर्तृत्वभोक्तृत्वादीनांद्विधाअवभासस्यात् नस्यात्तादात्म्याभिमाननाविवेकात् सकलधर्मविशि
ष्टस्यैवांतःकरणस्यात्मन्यध्यस्तत्वेनद्वयाभावात् तस्मादेकस्यात्मनउपाधिभेदेनप्रमात्रादिभेदव्यवस्थोपपत्तेःने
मांगतमतप्रवेशापत्तिःनवाविरोधःअन्याअपिव्यवस्थाःस्पष्टतरमुपदिष्टदृपपादयिष्यंते तस्माद्ब्रह्मनरूपस्यात्मनःस
षुप्तावव्यभिचारित्वाद्देहेंद्रियादीनांव्याभिचारित्वाद्दृश्यत्वाच्चतत्रतत्रात्मबुद्धिस्तेषांतर्षावादिनांभ्रांतिरूपनिष्पन्ने
वमतंप्रमाणमितिसिद्धं स्यादेतत्आत्मनोनिर्धर्मकत्वेप्रमात्रादिव्यवहारस्याध्यासमूलत्वेनचब्राह्मणेनयश्चेति
येवमादीनांशास्त्राणांअप्रामाण्यप्रसंगःअकर्तुरभोक्तुश्चात्मनः प्रवृत्त्यनुपपत्तेःवेदाप्रामाण्येचकुतोब्रह्म
सिद्धिरपितस्यतन्मात्रगम्यत्वात् शास्त्रयोनित्वादितिन्यायात तथाचवेदप्रामाण्यायप्रमात्रादिव्यवहारस्य
सत्यत्वमभ्युपेयमेयइत्याशंक्यदंतत्वज्ञानात्पूर्वं अप्रामाण्यमापाद्यतेनुध्वंवातत्राद्येसर्वेषांप्रमाणानांअविद्या

तद्विषयत्वेनतद्दृश्यांबाधाभावाच्छ्रुत्यूहंप्रामाण्यंहित्वेत्यविरुद्धपंक्तिरेवेत्याह नवर्णोसवर्णोनाश्रमाचारधर्मानमे
धारणाध्यासयोगादपि अनात्माश्रयाहंममाध्यासहानाद्धानात्तदेकोविशिष्टःशिवःकेवलोहं वर्णाःब्राह्मणक्षत्रि
यवैश्यशूद्राःआश्रमाः ब्रह्मचारिगृहस्थवानप्रस्थभिक्षवःआचाराःस्नानशौचादयःधर्माःब्रह्मचर्यगुरुसेवका
दयः अत्रद्वयःदुर्गाषष्ठीनटपुरुषोवर्णानामाचारधर्माश्चलक्ष्यंते धारणाबाह्यविषयसंगनमस्तैर्यं ध्यानंपर
मात्मचिंतनंयोगश्चित्तवृत्तिनिरोधःआदिशब्देश्रवणमननादयोगृह्यंतेसर्वेषांज्ञानोत्तरकालमसत्वेहेतुमाहा
नात्माश्रयाहंममाध्यासहानात् अनात्माआत्मविरोधिनीअविद्यातदाश्रयतमपादानोयोहंकारममकारध
ध्यासस्तस्यसमूलस्यापित्तत्वज्ञानेनहानात् नत्वयत्नवर्णाश्रमादिव्यवहारोनास्तीत्यर्थः वर्णाश्रमादिव्यवहार
स्यमिथ्याज्ञानमात्रमूलत्वेनमिथ्यात्वंदृढयितुंनदृतिरेकसुषुप्तोव्यतिरेकमाह नमातापितावानूकानलोकानवेद
दानयज्ञानतीर्थंदृवंतिसुषुप्तोनिरस्तातिस्वात्मदृवंतदेकोविशिष्टःशिवःकेवलोहं ३ माताजनकस्तापिताज

नवः पुमान् देवाइंद्रादयः लोकाः तदाराधनफलादि स्वर्गादि निवेदा अलौकिकहिताहितसाधनतां प्रतिपादकानि ब्रह्म
प्रतिपादकानि च प्रमाणवाक्यानि यज्ञाः स्वर्गादिसाधनभूतज्योतिष्टोमादयः तीर्थयज्ञादिसाधनभूताः आराध्याः रु
द्रेन्द्रादिदेवाः तावपापदर्मसाधनान्युपलक्षणीयानि सर्वपापदहनसामान्यमूलत्वात् तदभावस्वतस्संबंधाभावाद् विद्य
मानेऽप्यर्थः तथा च स्मृतिं प्रदर्श्य श्रुतिरन्यापि तापितामवति माता मातालोका लोकोदवा अदवावेदा अवेदा अत्रस्ते
नोस्ते नोस्तवति भ्रूणहा भ्रृणहास्तवति चांडालो चांडालः पौल्कसो पौल्कसः श्रमणो श्रमणस्तापसो तापसः नन्वाग
तं पुण्येन अनन्वागतं पापेनातीर्णो हि तदा सर्वान् शोकान् हृदयस्य मवतित्याद्या अभिमानाभावे सर्वानर्थनिवृत्तिमस
वदंति ननु सर्वव्यवहाराभावश्शून्यैतवस्मान्नित्याहुर्निरस्तातिशून्यात्मकत्वादिति निरस्तं अतिशून्यात्मकत्वं यस्मात्तत्त
थाभावप्रधानोनिर्देशः तस्यस्मृतिसाधकत्वात् पुनरुक्तान्नानुपपत्तेश्च अविनाशिवाऽरेयमात्माऽनुच्छित्तिधर्ममात्रा रास०
संसर्गस्त्वसंभवतियद्वै तन्न पश्यतीवपश्यन्वै तन्न पश्यतिनहि द्रष्टुर्दृष्टेर्विपरिलोपोविद्यते अविनाशित्वान्नतुतद्द्वितीय १३

मस्तीत्यादिश्रुतिभ्यश्चात्मचैतन्यस्यननुसधुप्तौहन्यतेत्यर्थः निराकृतमपेतत्पुनरपिस्थूणानिखननन्यायेननिराक्रियेत
यद्वानिरस्तमज्ञानाद्यचैतन्यमद्वितीयमतिरस्कृत्यैयद्ब्रह्मतदात्मकत्वाज्जीवस्यतथाचश्रुतिः यदावैपुरुषस्यैषानिनामसता
सौम्यतदासंपन्नोभवतिस्वमपीतोभवतितद्यथाप्रिययास्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमेवायंपुरुषप्राज्ञेनात्मनासंप
रिष्वक्तोनबाह्यंकिंचनवेदनांतरमितितेनजगत्कारणंसूतसर्वज्ञसर्वशक्तिपरिपूर्णानंदबोधरूपेणब्रह्मणासहजीवस्य
दसंसार्यवजीवइतिसिद्धं एवंतावन्निर्दोषैःश्रुतैःवादिविप्रतिपत्तिनिराकरणपूर्वकंस्वपदार्थानिर्धारितः संप्रतितस
दार्थस्तथैवनिर्धारणीयः तत्रनिराकार्यावादिविप्रतिपत्तयः प्रदर्श्यंतेननुब्रह्मणासहजीवस्यैक्यमुपपद्यतेतथाहिसच
शब्दवाच्यंजगत्कारणंब्रह्मसदेवसोम्येदमग्रआसीदित्यादिवाक्येनप्रतिपादितंतज्जगत्कारणंचैकंप्रधानमतिनामि
तिसांख्याःपरमपतिरेवजगत्कारणंसचेतनोपिजितादिभिःसउपास्यएवेतिपाशुपताःभगवान्वासुदेवईश्वरो
जगत्कारणं तस्मादुत्पद्यतेसंकर्षणाख्योजीवः तस्मान्मनः प्रद्युम्नः ततोहंकारोनिरुद्धः तेनकार्यंजीवस्यतेन

सहनब्रह्मणोवासुदेवस्यात्यंताभेदइतिपांचरात्रिकाः परिणामिनित्यः सर्वज्ञोभिन्नाभिन्नइतिजैनास्त्विदंदिनस्य
नास्तिसर्वज्ञत्वायुपेतं ब्रह्मआम्नायस्यक्रियापरत्वेनतत्रतात्पर्याभावात् किंतुवाग्दन्वादिवत्सर्वज्ञत्वादिदृष्याऽ
जगत्कारणंपरमाण्वादिवाजाहिवाऽपास्यइतिमीमांसकाः आस्तिनित्यज्ञानादिमानीश्वरस्सर्वज्ञः पृथिव्यादि
कार्यालिंगानुमितः सन्नजीवादिभ्रमएवेतितार्किकः क्षणिकस्सर्वज्ञइतिसागताः क्लेशकर्मविपाकाशयैरपरामृष्टऽ
नित्यज्ञानरूपः प्रधानांशसत्वगुणप्रतिफलिततयासर्वज्ञः संसारिपुरुषविलक्षणएवेतिपातंजलाः अहिती
य परमानंदएवब्रह्मतच्चजीवस्यवास्तवंस्वरूपंमायायाच्यसर्वज्ञत्वादिविशिष्टंजगदुपादाननिमित्तंचेत्यौप
निषदाः एवंवादिविप्रतिपत्तिभिः संदिग्धेतत्पदार्थेऽपनिषदपक्षपरिग्रहेणनिर्णयायाहभगवान्भा
ष्यकारः नमांख्यनरौवेनतत्पांचरात्रनजैननमीमांसकादर्शनंवा विशिष्यानुसृत्याविरुद्धात्मकत्वान्तदेको रामः
वशिष्टःशिवःकेवलोहं ४ आदिशब्देनअनुक्तपरिग्रहः नतावदंचेतनंजगदुपादानंतदेक्षतबहुस्यांप्रऽ १४

जायेयतीक्षणपूर्वकसृष्टिश्रवणात् अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणितेचजीवात्मत्वव्यपदे
शात् येनाश्रुतंश्रुतंभवतिअमतंमतंमविज्ञातंविज्ञातमितीयास्मिन्विज्ञातेसर्वमिदंविज्ञातमितिचैकविज्ञानेन
सर्वविज्ञानेनप्रतिपादनात्प्रधानज्ञानेचतदप्रवृत्तिकानांपुरुषाणांज्ञातुमशक्यत्वात् वितदात्म्यमिदंसर्वंतत्सत्यं
सआत्मातत्वमसीतिचतदभेदस्यनवकृत्यउपदेशात् तस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिश्रुत्यंतरात्ऽ
अचेतनस्यजगत्कारणत्वेविचित्ररचनानुपपत्तेःप्रधानमहदादेरप्रामाणिकत्वाच्चनसांख्यमतंसाधुएवंपाशुपतं
पांचरात्रंजैनंचमतंश्रुतियुक्तिबाधितत्वादयुक्तंनचविधिशेषत्वाच्छ्रुतिर्नार्थप्रतिपादयतिमीमांसकमतंयुक्तं
असिद्धत्वाद्विधिशेषत्वस्यनचार्थवादोधिकरणन्यायाद्विधिशेषत्वेपिस्वतःप्रयोजनतदर्थाप्रतिपादका
नांवायूदृक्षोपनिषेवमादिमांस्वाध्यायविधिग्रहणान्यथानुपपत्याप्रयोजनवदर्थपरत्वकल्पनीयेशब्दभावनेति
कर्त्तव्यतांशसाकांक्षस्यविधिसंप्रदानभूतदेवतादिस्तुतिद्वारेणतदंशपूरकत्वाच्चरणाव्वदग्धरथन्यायेनतदुभयैक

वाक्यनितिअर्थवादाधिकरणेनिर्णीतंवेदांतवाक्यजन्यज्ञानातुसाक्षादेवपरमानंदप्राप्तिःनिरशेषदुःखनिवृत्ति
स्यपुरुषार्थत्वमनइतिनिरस्तंतस्मात्तत्त्वमस्यादिवाक्यशेषत्वंसंभवतिप्रत्यक्षविधीयमानंअंतःकरणशुद्धिद्वारानत्वेष
तांसजतइतितस्मात्वेदांतिवाधिनाज्ञातत्त्वापरत्वेनवेदांतानांस्वतएवप्रामाण्यंवेदस्यैवब्रह्मप्रतिनमीमांसक
मतसिद्धिःतार्किकादीनांचमतंतत्वमस्यहंब्रह्मास्मिअयमात्माब्रह्मसत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतिबाधितंचरा
वंरावमेवाद्वितीयंब्रह्मनहनानास्तिकिंचनेत्यादिश्रुतिबाधितंचभिन्नाभिन्नात्वंसणिकत्वंचाकाशवत्सर्वगतस्य
नित्यइत्यादिश्रुतिबाधितंचअत्रचसर्वेषामतस्यानत्वेप्रतिज्ञातेविरुद्धात्मकत्वादिनिहेतुःनिर्विकल्पकाद्विती
यत्वेनेतन्यत्रूपत्वादित्यर्थः अत्रहेतुद्विशिष्टानुभूत्यतिविशिष्टासविकल्पानुभूतिभ्योव्यावृत्तायातत्वमस्यादि
वाक्यजन्याअखंडानुभूतिस्तथेत्यर्थः तेनसर्वव्यापकमद्वितीयंपरमानंदबोधरूपंब्रह्मेतिसिद्धं ननुसे
षोअणिमाअणोरणीयानितिब्रह्मणोणुत्वश्रुतेःअंगुष्ठमात्रःपुरुषःआरायमात्रोह्यवरोपिदृष्टइत्यादिः

श्रुतिप्रतिपादितानुजीवाभिन्नत्वान्नब्रह्मणसर्वव्यापकत्वमित्याशंक्यब्रह्मैवेदममृतंपुरस्तात्पश्चाद्ब्रह्मदक्षिणतश्चोत्तरेणाधश्चोर्ध्वंविप्रसृतं ब्रह्मैवेदंविश्वमिदंवरिष्ठंनदेनत् ब्रह्मपूर्वमनुपरमानंतरमबाह्यमित्याद्याःश्रुतयोनिर्विशेषमेवब्रह्मप्रतिपादयंतीति पूर्वोक्तमेवदृढयन्नाह नचोर्ध्वंनचाधोनचांतर्नबाह्यंनमध्यंनतिर्यङ्नपूर्वापरादिवद्वियद्व्यापकत्वादखंडैकरूपस्तदवावशिष्यःशिवःकेवलोहं ५ वियद्व्यापवत्वादाकाशवत्सर्वगतश्चनित्यइतिश्रुतेः वियतोव्यापकत्वादितिवा जायमानकाशान्महतोरणीयानितिश्रुतेः जीवस्यसकलदेहव्यापिचैतन्यालब्ध्यामहत्वंयुपाधिधर्माध्यासेनाग्रमात्रत्वाभिधानात् बुध्यैगुणेनात्मगुणेनचैवह्याग्रमात्रोह्यवरोहिदृष्टइतिश्रुतेःब्रह्मणश्चसूक्ष्मत्वाभिप्रायेणाणुत्वव्यपदेशान्नशेषमतिरोहितार्थकंस्यादेतत् ब्रह्मणोजगदुपादानत्वादुपादानोपादेययोश्चाभेदाद्धिभिन्नंजगदभिन्नंचेनब्रह्मणोदुःखरूपत्वान्नतदभिन्नंचेनजीवस्यपरमपुरुषार्थप्राप्तिरित्याशंक्यब्रह्मणश्चप्रकाशपरमानंदरूपत्वान्नि

खिलजगद्भाधिष्ठानत्वेनकारणत्वव्यपदेशादध्यस्तत्वेनसंबंधाभावान्नतन्नानर्थतेजोयस्तीत्याह नशूक्लंन
कृष्णंनरक्तंनपित्तंनकुष्ठंनपीतंनह्रस्वंनदीर्घं अनूपंतथाज्योतिराकारकत्वान्तदेकावशिष्टःशिवःकेवलोऽहं
ब्रह्मनूपिनंमहत्ह्रस्वंदीर्घमितिचनुविधपरिमाणनिषेधात्द्रव्यत्वप्रतिनिषेधःनूयतइतिनूपंप्रमेयंनप्र
म मेयंनूपंतेनसर्वेषामवद्रव्यगुणकर्मादिपदार्थानांतन्नद्वाद्यभ्यपगतानांनिषेधः तथाचश्रुतिवस्थूलमनण्व
ह्रस्वमदीर्घमलोहितमित्याद्या अशब्दमस्पर्शमनूपमव्ययंतथारसंनित्यमगंधवच्चयदित्याद्याश्चसर्वानर्थ
शून्यंपरमात्मस्वनूपंप्रतिपादयंतिश्रोतस्यार्थस्यन्यायेननिर्णायहेतुमहज्ज्योतिराकारकत्वादितिस्वप्रका
शज्ञाननूपत्वेनअप्रमेयत्वात्प्रमेयत्वेघटादिवज्जडत्वापत्तेः एतदप्रमेयंध्रुवमितिश्रुतश्चसर्वः ननुरन्यत्र
ब्रह्मभावउपदिश्यतेब्रह्मणोब्रह्मणोवानांत्यःतस्यजडत्वादसत्वान्नाद्यःउपदेशानर्थक्यात्ब्रह्मभावस्यस्वत राम०
एवासिद्धत्वात् जीवस्यसतोब्रह्मभावेप्यविधानंज्ञानेननिर्वर्त्यतइतिचेन्न अविद्यानिवृत्तेरात्मभिन्नत्वेहे १६

तापत्तेर्ब्रह्मत्वणोसिद्धप्रसंगाच्च तदुक्तंवार्त्तिके अव्याकृताननुगतंवस्तुब्रह्मेतिगएषतेब्रह्मार्थोदुर्लभोन्यस्याहिती
येसतिवस्तुनिति अभिप्रेत्यएषउपदेशानर्थक्यमित्युक्तं तत्रविंपरमार्थतः पक्षासावमसिप्रतिषिंवाप्रतीतितोपित
त्राध्यमिणापत्तापदिहरति नशास्तानशास्त्रंनशिष्योनशिक्षानचैनचाहंनचायंप्रपंचः स्वरूपावबोधोवि
कल्पासहिष्णुस्तदेवावशिष्टःशिवःकेवलोहं ७ शास्ताउपदेशकर्त्ता शास्त्रमुपदेशकरणं शिष्यउपदेशकर्मशिक्षा
उपदेशक्रियातेभ्योन्या अहंवक्ता अयंसर्वप्रमाणंसंनिधापितः प्रपंचःदेहेंद्रियादिरनर्थः परमार्थतोनास्ती
त्यर्थः द्वितीयनिराकरणेतिस्वरूपेतिअयमर्थः यद्यप्यविद्यानिवृत्तिरात्माअनात्मावेत्यादिविकल्पनाक्षमापि
लंनिरूपयितुंनशक्यतेतथापिस्वरूपावबोधोज्ञानफलमनुभूयते नचैतत्तथामितिविकल्पनीयंसर्वहेतोपम
र्थनाविकल्पासहिष्णुत्वात् नहिदृष्टेअनुपपन्नंनामतथाचश्रुतिः नानिरोधोनचोत्पत्तिर्नबधोनचसाधनः नमु
मुक्षुर्नमुक्तइत्येषापरमार्थता ब्रह्मवाइदमग्रआसीतादात्मनमेवावेदअहंब्रह्मास्मीतितत्तस्मात्सर्वमभवदि

साद्यापूर्वमपिब्रह्मनपसेवसतोजीवस्यज्ञानाद्वह्मभावंदर्शयतिसर्वंचैतंवारयतिनन्वात्मनःस्वप्रकाशचैतन्य
नपत्वेनसर्वदाभासमानेजाग्रत्स्वप्नसुषुप्यादिव्यवस्थाकथंनचनेत्यवव्यवस्थितिवाच्यं तथानसतिसर्वस्यैवस्व
प्रत्वापत्तेरितिचेन्नलक्षणतस्त्रयाणामपिस्वप्नत्वेपिप्रतिभासतअविद्यकविशेषसंम्वादनाद्विलक्षणत्वेनन्यस
विशेषत्वाद्व्यवस्थोपपत्तेः परमार्थतस्तुनकापिव्यवस्थेत्याह नजाग्रन्नमस्वप्नकोवासुषुप्तिर्नाविद्वानवाते
जसःप्राज्ञकोवा अविद्यात्मकत्वात्त्रयाणांतुरीय्यस्तदकावशिष्टःशिवःकेवलोहं ६ अत्रलयक्रमेणपोवापि
र्यनिर्देशः तथाहि तत्रिन्मतेपदार्थोद्विविधःदृग्दृश्यश्चअन्यवादिपरिकल्पितानांपदार्थानामत्रैवांतर्भा
वात्तत्रदृक्पदार्थआत्मापारमार्थिकः एवःसर्वदैकरूपोपाधिकभेदेनत्रिविधःईश्वराजीवःसाक्षी
चेतितत्रकारणशरीराज्ञानोपाधिरीश्वरः अंतःकरणतत्संस्कारावविज्ञानोपहितोजीवःप्रपंचंचैतन्य राम०
धर्मस्थात् अविद्याप्रतिबिंबेश्वरपक्षेबिंबचैतन्यंबिंबेश्वरपक्षेबिंबप्रतिबिंबमुखानुगतमुखस्वरूपवज्जी ७७

केश्वरानुगतसर्वानुसंधानचैतन्यसाक्षित्यतत्तत्तवार्त्तिककारमतेनेश्वरएवसाक्षीतित्र्यैविध्यमेवजीवेश्वरभेद
नदृशःतत्रेश्वरोपित्रिविधःस्वोपाधिभूताविद्यागुणत्रयभेदनविष्णुब्रह्मरुद्रादिभेदानकारणीभूतात्सत्वगु
णावछिन्नोविष्णुःपालयितेकारणीभूतरजउपहितोब्रह्मास्रष्टाहिरण्यगर्भस्कूमहाभूतकारणत्वाभावाभ्रह्म
त्वतथापिस्थूलभूतसृष्टित्वात्तद्व्यपदिश्यतेकारणीभूततमउपहितःरुद्रःसंहर्तातएवंचएकस्यैवचतुर्मुज
चतुर्मुखपंचमुखाद्याःपुमानाकाराःश्रीभारतीभवान्याद्याश्चतास्त्र्याकाराःअन्यचमध्यस्थदूर्मादियोअनं
तावतारान्तलयेवाविर्भवंति भक्तानुग्रहार्थमित्यवधेयं जीवोपित्रिविधःस्वोपाध्यवांतरभेदेनाश्वत्तेजसप्राज्ञ
भेदात्तत्राविद्यांतःकरणस्थूलशरीरावछिन्नोजाग्रदवस्थाभिमानीविश्वःसएवस्थूलशरीराभिमानरहि
तः उपाधिद्वयोपरहितःस्वप्नावस्थाभिमानीतैजसःशरीरांतःकरणोपाधिद्वयरहितांतःकरणसंस्कारावछि
न्नाविद्यामात्रोपहितसुषुप्त्यवस्थाभिमानीप्राज्ञःएतेषांचस्वतंत्रोपाधिभेदाभावेनस्वतंत्रभेदाभावेपिअउ

वांतरोपाधिभेदादवस्थापिअवांतरभेदाव्यवहार्यंतेसाक्षीतुसंघातासर्वानुगतस्तूरीयाख्यएवविधएवतत्रोपाधि सर्वानु०
भेदेनापिनकश्चिद्वेदस्तदुपोद्रलूपवादविघातव्यायतत्कार्यात्मकःप्रपंचोदृश्यपदार्थःतस्यचापारमार्थिकत्वेपि
व्यावहारिकसत्यत्वाभ्युपगमान्नस्वाप्निकपदार्थवन्निरूपणंव्यर्थंउपासनादाउपयोगादितिसापित्रिविधःअव्याकृ
तमूर्त्तामूर्तभेदात्ततत्रसामासाविद्यामूर्त्तामूर्त्तप्रपंचबीजशक्तिरूपात्तदजन्यलपितन्निवृत्तौनिवर्त्तमानत्वनत्व्या
ख्यचेतन्यतत्संबंधजीवेश्वरविभागाचिदाभासैःसहानादित्वादव्याकृतमित्युच्यतेसाचस्वयंजडाप्यजडेनचिदा
भासेनाज्वलितापूर्वपूर्वसंस्कारजीववर्त्मप्रयुक्तासतिशब्दस्पर्शरूपरसगंधात्मकाव्याकाशवायुतेजोजलपृथि
व्याख्यानिमहाभूतानिजनयतितत्रपूर्वपूर्वभावापन्नायाअविद्यायाउत्तरोत्तरंप्रतिकारणत्वात्पूर्वपूर्वभूतगु
णानांउत्तरोत्तरभूतेष्वनुप्रवेशःएवमविद्यातएवांधकारोपिभावरूपोपएवावरणात्मोचास्रूपज्ञानविरोध्याजो रामo
दनाश्यश्चअडिमहाविद्युदादिवदाविर्भवतीतिरामवतीतिसिद्धांतःसंस्कारहेतुदेहोपादानत्वाच्चभावाच्चैश्रुतः न १८

तिषुसप्तिप्रक्रियायामाम्नायतइत्यविरोधः दिक्कालौतुप्रामाणिकत्वान्नैकोआकाशस्यैवदिग्व्यवहारजनकत्वसं
भवात् दिशःश्रोत्रमितिश्रुतेः कालस्तुक्रियैवतस्याएववर्तनस्याएववर्षवीचारत्वादितिअर्थेचाव्याकृतपदार्थईश्व
रोपाधिःतानिनसूक्ष्माण्यपंचीकृतानिपंचमहाभूतान्यमूर्त्तारव्यानिकारणेव्यात् सत्वरजस्तमोगुणात्मकानि
सत्वांशप्राधान्यनज्ञानक्रियाशक्त्यात्मकमेवंस्वलक्षव्यंचित्रंनूपमिवमिलित्वाजनयंतिनस्यज्ञानशक्तिप्रधानांशो
तःकरणंतत्रबुद्धिर्मनइतिचोच्यतेहिधाक्रियाशक्तिःप्रधानांशःप्राणःसचपंचधा प्राणापानोव्यानउदानःसमा
नइतिरवमेवकमूतयोज्ञानक्रियाशक्तिमेदात् प्रत्येकमिंद्रियद्वयंद्वयंजायतेआकाशाद्रोत्रंवाचोनायोस्त्वक्पा
णितेजस्यचक्षुःपादोअब्योरसनपायूपृथिव्याघ्राणंपस्त्रोत्रेतिअत्रतेजोमयीवाणीतिश्रुतेःतेजसीवाक्पाद
स्तूनामसइतिकेचित् शब्दव्यंजकेंद्रियत्वेनश्रोत्रवद्वाचोनामसत्वंपादादिचिदंशयाचक्षुषस्तस्यदर्शनाच्चक्ष
र्वत्पादस्यापितेजसत्वंयुक्तमुत्पश्यामः तेजोमयीत्वश्रुतिस्तुमनसःपंचमूतकार्यस्यापिअन्नमयत्वश्रुतिरिव

तदुपकार्यतयाव्यारब्धया मनसश्चपंचभूतगुणग्राहकत्वेनतद्बुद्धिनिर्व्ययात् पंचभूतात्मकत्वमित्यन्यदेतन्न
तेषामधिष्ठातारोदेवाअपिज्ञानशक्तिक्रियाप्रधानाःदिगग्नीवातेंद्रौआदित्यविष्णुवरुणमित्रौउपेंद्रप्रजापतयः
तीइतितन्त्रज्ञानशक्तिसमन्वितंतःकरणंक्रियाशक्तिसमन्वितःप्राणःशब्दस्पर्शरूपरसगंधग्राहकाणित्रोत्रत्वक्
क्षुरसनघ्राणाख्यानिपंचज्ञानेंद्रियाणित्वक्चक्षुरक्षीस्वग्राह्यगुणान्प्रियद्रव्यमपिगृह्णीतःश्रोत्रमपिशब्द
दूरत्वादिग्राहकंदूरशब्दइतिप्रसयात् वचनादानगतिविसर्गआनंदजनकानिवाक्पाणिपादपायूपस्था
निकर्मेंद्रियाणिएतत्त्रसंवेमिलित्वासप्तदशकंलिंगंज्ञानशक्तिप्राधान्येनहिरण्यगर्भःक्रियाशक्तिधान्येनसू त्रा
त्मेतिचोच्यतेअयममूर्त्तःपदार्थःकार्यत्वाद्यौगमतेचजीवोपाधिरेवतानिचभूतानिभोगायतनंशरीरं
भोग्यंचविषयमंतरेणभोगोजनयितुमशक्नुवंतिजीवकर्मप्रयुक्तत्वात्स्थाल्यायपंचौदनानिभवंतितत्रचप्र
त्येकंपंचभूतानिद्वेद्वेधाविभज्यंतेतत्रैकैकोभागश्चतुर्धाविभज्यतेतद्भागचतुष्टयंस्वभागंविहायइतरच्चतु

मुख्यार्थेभागेप्रविशंतीतिस्वस्यार्धभागेनेतेनषाण्मण्मभागेनचपंचीकरणान्मेलनेप्यधिक्यादाकाशादिशब्दप्र
योगः अत्रत्रिवृतमेवैकांकरवाणीतिश्रुतेःत्रिवृतंकुर्वतउपदेशादितिसूत्रात्रयाणामेवमेलनप्रतीतेस्त्रिवृ
त्करणमेवकेचिन्मन्यंतेतन्नविचदधिकरणन्यायेनवानिरस्ताः तथाहितैत्तरीयेनस्माद्वायोरात्मनआकाशःसंभू
तः आकाशाद्वायुरितिश्रुतेः छांदोग्येत्रयाणांतेजोबन्नानांसृष्ट्यवणेपिद्वयोरुपसंहारःतेजसःप्राधान्यपदार्थध
र्मापेक्षयाकाशवायुपदार्थयोर्बलीयस्त्वात् छांदोग्येयेनाविज्ञानेनसर्वविज्ञानप्रतिज्ञानादाकाशवाय्वोश्चेतन
योर्ब्रह्मकार्यत्वस्यावश्यवाच्यत्वात्तत्रपंचानामपिमेलनेयवयुत्यानुवादेनात्रिवत्करणश्रुत्युपपत्तिः त्रिवृत्तमे
वेतितुवत्यनायावाक्यमेदप्रसंगइत्याद्यूहनीयात्रिवृत्तूलंब्रतउपदेशादितिसूत्रंत्यनुवादत्वान्नपंचीकरणन्याय
सिद्धं बाधितुमुत्सहतेमेलनप्रतीतिस्तुशरीरादीपंचानामविशिष्टेपंचीकृतपंचमहाभूतानीतिभाष्यकारवच
नाच्चतस्मादलमनेनानात्मचिंतनेनेतिदिक् तानिचपंचीकृतानिपंचमहाभूतानिमूर्त्तान्यानिमिलित्वैकांडायोमिं

द्रियाणामधिष्ठानंभोगायतन्मनुष्यादयंतितदेवशरीरमित्युच्यते तत्रसत्वप्रधानंदेवशरीरंरजःप्रधानंमनुष्यशरी
२० रंतमःप्रधानंतिर्यगादिस्थावरांतंशरीरं तस्यचशरीरस्यपांचभौतिकत्वेपिचित्ररूपस्यवद्भूयोन्यूनाधिक्यभावोभूता
नांविरुध्यते एवंविषयाअपिपंचीकृतेककृतारब्धाअनुदरामनुवनाख्याऊर्ध्वमध्याधोभावेनसत्वरजतमोंशप्र
धानधरादयश्चरंतश्चसर्वेब्रह्मांडाख्यंविराडितिमूर्त्तामितियोच्यते अयमेवोपनिषदः स्वकारणाद्विपरीतोय
क्रमःमूर्त्तंपंचीकृतपंचमहाभूततत्कार्यात्मकंविराडाख्यंपृथिव्याद्यैरेककृतलयेनअमूर्तंपंचीकृतमहाभूतात्म
केहिरण्यगर्भाख्येस्वकारणेलीयतेसएवेदंनदिनःप्रलयःअमूर्त्तंचाव्याकृतेपरमेश्वरोपाधौअव्याकृतस्यत्व
नाधित्वेनकारणत्वाभावान्नलयःस्वकारणेसूक्ष्मरूपेणावस्थानंलयइतितल्लक्षणात् अयमेवप्राकृतःप्रलयःब्र
ह्मज्ञानाद्बंधस्यात्यंतिकःप्रलयःस्वकारणक्रमेणैवकारणेऽविद्यादेवकार्येऽविद्यातत्कार्यसर्वस्यसृष्टिप्रलयादिबंधस्वप्रस राम०
ष्टिप्रलयवदपारमार्थिकस्यापिवासनादार्ढ्यद्व्यवहारक्षममितिनापारमार्थिकत्वेपितुच्छत्वप्रसंगः यथाचैतत्तथाव्य २०

कसावरणवस्थितिजागराणादिव्यवस्थोच्यते इंद्रियवृत्तिकालीनोर्थोपलब्धोजागरणंतत्रचमूर्त्तोविराडाख्यंभोग्यंप्र
त्यक्षादिप्रमाणैष्टेनव्यवहार्यमाणत्वाव्यावहारिकंविश्वाख्येनजीवेनोपभुज्यतेसन्देहेंद्रियादिषुप्रवेशाव्याप
कत्वाद्विश्वइत्युच्यतेविशप्रवेशनेविभुव्याप्तावितिस्मरणात् अत्रयद्यपिकिञ्चेनामूर्त्तंद्रव्यमव्याकृतांचअनुमानादी
नितानुभूयते तथापिव्यावहारिकंसर्वंविश्वेनवज्ञायतइतिनियमात् स्थूलशरीरोपाध्यभिमानत्वाच्चजनतस्थाव
स्थानव्यापकत्वंशक्तिरजितादिज्ञानानामप्राणिकत्वात्तद्विषयस्यव्यावहारिकत्वेपिइंद्रियव्यापारकालीनत्वाज्जाग
रणोपपत्तिः ज्ञानोत्पत्तिपत्रियाचाधस्तादुक्तेवरंवजायद्वोगजनवत्कर्मक्षयेस्वप्नभोगजनकमोदयेचनामस्यानिद्रा
द्रव्यावृत्यास्थूलदेहाभिमानेहरीकृतेसर्वेंद्रियेषुदेवतानुग्रहाभावान्निर्व्यापारतयाकालीनेषुविश्वोपिलीनइत्युच्यते
तदास्वप्नावस्थातन्नातःवरणगतवासनानिमित्तइंद्रियवृत्त्यभावकालीनार्थोपलब्धिःस्वप्नःतत्रमनएवगजतुरंगाद्या
कारेणविवर्त्ततेअविद्यावृत्याचज्ञायतइतिवक्ष्यति अविद्यैवशक्तिरजतादिवत्स्वप्नार्थाकारेणपरिणमतेज्ञायतेचावि

लो

चावृत्येत्यन्येवकःपक्षःश्रेयानुत्तनः अविद्यायाएवसर्वत्रअर्थाध्यायोपादानत्वेनकल्पितत्वान्मनोगतंवासनानिमि
त्तत्वेनब्रह्मचिन्मतः परिणामित्वेनव्यपदेशात् ननुतदामनसोदृश्यात्कारपरिणामानभ्युपगमेद्रष्टृत्वासंभवेनआ ८
त्मनःस्वयंज्योतिष्ट्वासिद्धिरितिचेन्नबहिरिंद्रियवृत्त्यभावेनतदानींमनसोग्राह्यत्वात्तत्सहकारेणैवतस्यग्राहकत्वानिय
मात् सद्वृत्तिकांतःकरणावच्छिन्नस्यैवचैतन्यस्यप्रमातृत्वनियमात्ततदांतःकरणसत्वेपिप्रमात्रभावः विमधिष्ठानंस
माध्यासस्यमनोवच्छिन्नजीवचैतन्यमित्येकंमूलाज्ञानावच्छिन्नब्रह्मचैतन्यमित्यपरेश्रेयः मतमेदोभयमपितथा
विजायद्वाधेनस्वप्नभ्रमनिवृत्त्यध्युपगमात् अधिष्ठानज्ञानादेवभ्रमनिवृत्तिः ब्रह्मचैतन्यंचाधिष्ठानत्वंसंसारदशायां
तद्ज्ञानाभावात् ज्ञानवासवद्वृत्तिनिवर्त्तनंजायद्वाधात्स्वप्ननिवृत्तिःस्यात् सहिवृत्तीतिचजीवकर्तृत्वश्रुतेराकाशादिप्रपं
चवत्सर्वसाधारण्यापत्तेश्च समूलाज्ञानावच्छिन्नंब्रह्मचैतन्यमधिष्ठानंननुजीवचैतन्यस्यानावृतत्वेनसर्वदाभास राम०
मानत्वात्कथमधिष्ठानत्वंसत्यंतन्नापिस्वप्राध्यासानुकूलव्यावहारिकसंघातभानविरोध्यवस्थानाभ्युपगमात् स्वप्न २१

दशायांचाहंमनुष्यइत्यादिप्रातीतिकसंधातांतरभानान्यथानुपपत्तेः शय्यायांस्वपामितिशय्यांतनवत् ज्ञानसाम्
ग्र्यभावश्चेत्तुल्यएवनन्वहंमनुष्यइत्यादिव्यावहारिकसंघातज्ञानस्यैवप्रमाणजन्यत्वात् क्वयमज्ञाननिवर्त्तकता
अवस्थांतरान्यथानुपपत्त्यातत्कल्पनेचसुषुप्तावपिस्वप्नबाधकज्ञानमास्थेयंतच्चानिष्टंजाग्रत्वापत्तेरितिचेत्सा
ध्यवोचः स्वप्नावस्थाज्ञानस्यैवअंतःकरणलयसहितस्यसुषुप्तिनूपत्वान्ननन्तद्बाधः जागरणेतुमिथ्यैव
स्वप्नबाधित्यनुभवादाहमितिज्ञानस्यप्रमाणजन्यत्वेपियथार्थत्वाच्छरीरादिज्ञानस्यचप्रमाणजन्यत्वादवस्था
ज्ञानविरोधित्वमनुभवसिद्धं विशेषाज्ञानंतुनप्रमाणजन्यवृत्तिसंतरेणानिवर्त्ततेसाक्षिणश्चाविद्यानिवर्त्त
कत्वाभावात् अविद्यासाधकत्वेनैवधर्मिग्राहकमानसिद्धेरितिनविंचिदवद्यंयावंतिज्ञानानितावंतित्यज्ञाना
नीतिचान्यथागमाच्छुक्तिज्ञानेनेवव्यावहारिकसंभूतज्ञाननाज्ञाननिवृत्तावपिपुनरपिकदाचिद्रजतभ्रमवन्न
स्वप्नाध्यासानुपपत्तिरितिजीवचैतन्यमेवअधिष्ठानमितिपक्षेनकोपिमोक्षः यदापुनर्ब्रह्मज्ञानादेवाज्ञान

निवृत्त्यभ्युपगमः तदाज्ञानंदुःखभ्रमणसर्पभ्रमतिरोधानवत् अधिष्ठानज्ञानाभावेपिजायभ्रमेणस्वप्नभ्र
मतिरोभावोपपत्तेः ब्रह्मचैतन्यमेवस्वप्नाध्यासोपादानमितिपक्षेनदोष्यदोषः प्रतिजीवंस्वप्नासाधारण्यं ऽ
भनोगतवासनानामसाधारण्यादवस्तनोवच्छिन्नंब्रह्मचैतन्यमोपाधिष्ठानंतासिन्नऽपिपक्षेअव ऽ
स्थाज्ञानस्योवरकतांगीकारात् नकोयनुपपत्तिः अतएवशास्त्रेषुक्वचित्तथोतथाव्यपदेशः ननुमनो
वच्छिन्नचैतन्यस्यादिष्ठानत्वेअहंगजइत्याध्यहंकारसामानाधिकरण्येनैवप्रतीतिस्यात् इदंरजतमिति
शुक्तिसामानाधिकरण्येनरजतप्रतीतिवत् नत्वयंगजइतिब्रह्मचैतन्यस्याधिनत्वपक्षेपिगजइत्या ऽ
कारेवप्रतीतिः स्यान्नत्वयंगजइतितत्रापिदंकारास्पदीभूतत्वाद्यार्थांशावस्यसमानत्वादितिचेन्न आ
द्येपक्षेऽहंकारस्यनशुक्तिवदधिष्ठानावच्छेदकत्वेच्छुक्तिरजतमितिवदहंगजइतिनभ्रमाकारप्रसंगः राम०
अहमितिज्ञानस्ययंशुक्तिरितिज्ञानस्येवभ्रमविरोधित्वादिदमंशस्यभ्रमाविरोधिनैवतन्नाम्नाप्यु २२

पगमात् स्वप्नतंगजइत्याकारावदयमित्यकारेपिकल्पितएव उभयकारव्यधिष्णानभूतचैतन्यस्याबाधात्ऽ
शून्यवादप्रसंगः ज्ञायदृशायामपिइदंकारविलक्षणस्यप्रातीतिकस्यैवरजतेदंकारस्यभानात्युपगमात्ऽ
अध्यस्तमेवाहंपरिस्फुरतिन्नभोब्जितिन्यायात् दंकीदमंशभानपक्षेपिनेदमंशसत्यत्वमध्यासेप्रयोजकंकिं
लधिष्णानसत्यत्वं अधिष्णानंचतत्राज्ञानरूपंचैतन्यमिकमत्रापिसाक्षिचैतन्यंवियतएवतुपपादितंतत्सा
क्षपक्षद्वयेपिकाप्यनुपपत्तिः अतस्वाप्निरूपदार्थभोक्तातेजसइत्यप्यतेतजःप्रधानत्वात् आदित्यादिज्योति
ण रतेरेमासवत्वादितिवा एवंजाग्रत्स्वप्नभोगद्वयेनस्तोतस्यजीवस्यतदुभयकारणकर्मक्षयेसतिज्ञानशून्यवदि
न्नस्यसवासनस्यअंतःकरणस्यकारणात्मनावस्थानेसतिविश्रामस्थानंसुषुप्तावस्थानकारणमात्रोपलंभः
सुषुप्तिःज्ञायस्वप्नभोग्यपदार्थज्ञानाभावेपिसास्याकारंसूत्रवाकारंअवस्थाज्ञानाकारंचाविद्यायाप्रवृत्तित्रयमभ्यु
पेयते अहंकाराभावान्नतेनेवाविशिष्टवृत्तिः सुषुप्तभावप्रसंगात् वृत्तिरूपस्योपादेयस्याभावान्नप्रलयेतिव्या

प्तिः तत्तत्कल्पनाबीजाभावात् इहचसुखमहमस्वाप्नंनकिंचिदहमवेदिषमितिसुप्तोत्थितस्यपरामर्शात्
नानुभवेपरामर्शानुपपत्तेः अंतःकरणेपरमकालीनानुभवजन्यत्वाच्च तत्तत्तोल्लेखाभावेपिस्मरणत्वानु
पपत्तिः स्मरणेतुतत्तोल्लेखनियमाभावाच्च जाग्रद्दशायामस्वाप्सामित्यनुभवानुपपत्तेश्च लिंगाभावे
नआश्रयासिध्याचअनुमानासंभवात् अहंकारस्तूत्थानसमयएवानुभूयतेसुषुप्तौलीनत्वेनतस्या
ननुभूतत्वात् स्मरणानुपपत्तिः मुखप्रतिबिंबाश्रयदर्पणेजपाकुसुमलोहित्याध्यासेनरक्तंमुखमितिं
प्रतीतिवत् अहंकाराश्रयसाक्षिचैतन्यस्यस्मरणाश्रयत्वादहमस्वाप्सामितिसामानाधिकरण्यप्र
तीतिः नपुनरहंस्मरतीतिप्रतीतिवदाश्रयतयास्मृतिसंशयविपर्ययाणां साक्षिचैतन्याश्रयत्वात्
अहंकारस्यप्रमाणजन्यज्ञानाश्रयत्वनियमात् प्रमात्वेनैवतत्कार्यतावच्छेदात् अप्रमात्वावच्छे
नाविद्यायाऽएवकारणत्वात् अतएवानाप्तवाक्यादिजन्यपरोक्षविपर्यसोपिअविद्यावृत्तिरेवेत्युभु

पगमोवेदांतविदांतत्रांतःकरणवृत्तिजनकसामग्रसंभवेपिप्रमात्वाभावात् बाधनांतःकरणस्यासामर्थ्यात्
नामादिब्रह्माध्यासस्तुश्रवणमननयोर्भ्रमप्रमाविलक्षणमनोवृत्तिरेवकामादिवत् तदुक्तं अतएवचोदनाजन्यत्वा
न्मानसीक्रियेषानज्ञानमिति एतेनांतःकरणस्यापिमनोवृत्तित्वंव्याख्यातं व्याधारोपणाव्यापकारोपासद्वस्यतस्यचा
धीनतयाभ्रमप्रमाविलक्षणत्वात् अतएवमननंनिधिध्यासनसहितेश्रवणाख्यवेदांतवाक्यार्थविचारस्तोतव्योमंतव्यानि
धिध्यासितव्यइत्यादिविधिरुपपद्यततस्यचतुर्विधान्वयव्यतिरेकादितद्वद्रूपत्वात् दृग्दृश्यान्वयव्यतिरेकवद्दुःखिपरमप्रमास्प
दान्वयव्यतिरेकवत्साक्षिसाक्ष्यान्वयव्यतिरेकाइतिअनुवृत्तव्यावृत्तान्वयव्यतिरेकाइतिपंचमः एतत्रसर्वेषांवेदांतानुकूलतर्का
णांचतुर्लक्षणीमीमांसाप्रतिपादितानामुपलक्षणमित्यभियुक्ताः विस्तरस्तुवेदांतकल्पलतिकायामनुसंधेयः तदेवंसुषुप्त्यव
स्थायामस्यानंदभोगः तद्भोक्तासुषुप्त्यवस्थाभिमानीप्राज्ञइत्यत्रप्रवर्षतोजत्वात्तदानींविशेषावछेदाभावेनप्रवृत्तेश्चात्ता
तदानमंतःकरणस्यलयेपितत्संस्कारेणावछेदान्नजीवाभावप्रसंगेनवासर्वज्ञत्वापत्तेः ईश्वरानंदप्रतिपादनंचशरीरोद्रियाभिमा
नरहितत्वेनोपचारात्तत्संस्कारस्यचनिमित्तकारणत्वेनसास्थाश्रितकार्योपादानकोशवप्रवेशान्ननदुर्दनसाक्षिमदः जागरितांतः
करणस्यप्रमात्रातिकार्योपादानकोशप्रवेशात् नदुर्दनप्रमात्रभेदएव साक्षिणएवाश्रितोपाधिविशिष्टस्यप्रमाठ ७ ७-

ने खान्नप्रतिसंधानानुपपत्तिरितिमात्मानप्रैदपिप्रतिदेहंनभिद्यते साक्षिबाह्यार्थवत्तयस्मात्साआत्मत्यन्यते ततः
व्यभिचारोमिथ्यायत्प्रमात्रादेः नसाक्षिणःसर्वमात्राद्यभावार्थसाक्षित्वाच्चतयात्मनइतिवार्तिककारपाठेर्व्यवहा
रदशायामपिसाक्षिभेदनिराकरणात् सुषुप्तादृदवत्प्यनंकषांचिन्महामोहइत्यवधेयं ननुदुःखमहामस्वात्स
मितिकस्यचित्परामर्शात् सुषुप्तादुःखानुभवाप्यस्तुतदानींदुःखसामग्र्याविरहात्तदभावात् सुखस्यचआत्मस्व
रूपणनित्यत्वेन शय्यादरसमीचीनत्वेनदुःखमित्यपचारात् दुःखमहमस्वापमितिप्रत्ययोपपत्तिः अथवावन्नयस्या
पित्वविद्यांगीकारात् सुषुप्तावपिदुःखमुपपद्यतेतथाहिप्रमाज्ञानंजायज्जाग्रत् स्मृतिरजितादिविभ्रमोजायत्स्व
प्नः भ्रमादिनास्तीब्धीभावोजायत्सुषुप्ति रवंस्वप्नमंत्रादि प्राप्तिःस्वप्नजायत्स्वप्नेपिस्वप्नमयादृष्टइतिबुधिःस्व
प्नस्वप्नःजायद्दृशायांवक्यइतुंनशक्यतेस्वप्नावस्थायांचयत्किंचिदनुभूयतेतत्स्वप्नसुषुप्तिः रवंसुषुप्तावस्थायाम
पिसाविद्याख्यास्वाकारवृत्तिः सासुषुप्तिजाग्रत्ततदनंतरंसुखमहमस्वात्समितिपरामर्शःतत्रवक्यारोजसीवृत्तिः

सामसुप्तिःस्वप्नःतदनंतरंइदंअहमस्वाप्नमितिपरामर्शोपपत्तिः एवंतामसीवृत्तिःसुषुप्तिःतदनंतरंगाढंमूढोहमास
मितिपरामर्शः यथाचैतत्तथावासिष्ठवार्त्तिकामृतादौस्पष्टं एवमध्यात्मंविश्वःअधिभूतंविराट्तत् अधिदैवंविष्णुः
अध्यात्मंजाग्रत् अधिदैवंपालनं अधिभूतंसत्वगुणः एवमध्यात्मंतैजसः अधिभूतंहिरण्यगर्भः अधिभूतंअध्या
त्मंस्वप्नः अधिदैवंसर्गः अधिभूतंरजोगुणः एवमध्यात्मंप्राज्ञः अधिभूतमव्याकृतं अधिदैवंरुद्रः अध्यात्मसु
षुप्तिः अधिदैवंप्रलयः अधिभूततमोगुणः एवमध्यात्माधिभूतादिदेवानामेकत्वात्प्रणवावयवत्रयसहितानामे
तेषामेक्योपासनयाहिरण्यगर्भलोकप्राप्तिः अंतःकरणशुद्धिद्वारात्क्रममुक्तिश्चेत्यतसर्वोपाधिनिराकरणेनसाक्षिचत
न्यमात्रज्ञानेनसाक्षादेवमोक्षइतित्रयंवंत्रयाणामप्यवस्थात्रयसहितानांविश्वतैजसप्राज्ञानां अविद्यात्मकत्वाद्द
श्यत्वेनचमिथ्यात्वादनुपहितःकेवलस्साक्षितुरिदमहमस्मीत्यर्थः एवंव्यवहारतःसर्वव्यवस्थोपपत्तेःपरमार्थतः
वस्याअपिव्यवस्थायात्रमंवातन्नवाप्यनुपपत्तिः विस्तरेणतत्प्रपंचितमस्माभिः वेदांतकल्पलतिकायांइत्यलंपल्लवितेन ६

ननुजाग्रत्स्वप्नसुषुप्त्यवस्थासहितानांत्रयाणामपितद्दाभिमानिनांमिथ्यात्वात्तत्साक्षिणोऽपिमिथ्यात्वंस्यादविशेषाशंक्यवि
शेषाभिमाननसाक्षिणस्सत्वमाह अपिव्यापकत्वाधिकत्वप्रयोगात्सतांसिद्ध्यभावादनस्याश्रयत्वात् जगत्तुच्छत्वमात्तस्म
ात्तदन्यत्तदेकावशिष्टःशिवःकेवलोहं नदृष्टेर्द्रष्टारंपश्येरितिसाक्षिणं प्रकृत्यातोन्यदार्त्तमितिश्रुतेः साक्षिणोन्यत्सा
क्षंसर्वजगत्तुच्छेननुसाक्षीबाधादधित्वात् त्रमाधिष्ठानतयाऽज्ञातसत्वात्रतद्बाधयाहकासावाच्येत्याशंक्यतुक्तसमुच्च
यार्थोऽपिशब्दः अथयदल्पंतन्मर्त्यमितिश्रुतेःपरिच्छिन्नवतुच्छत्वयोसमव्याप्तत्वात् परिच्छिन्नवनिवृत्यातुर्द्धनिवृत्ति व
रित्याह व्यापकत्वादिति सर्वंखल्विदंब्रह्मेतिसर्वात्मत्वोपदेशनदेशकालापरिच्छिन्नत्वात् आकाशादीनांचदेशकाल
परिच्छिन्नतेत्यापेक्षिकमहत्वेनव्यापकत्वोपचारात् ननुसर्वव्यापकत्वेननित्यत्वाद्भावरूपत्वान्नात्मानदुःखनिवृत्तिरूपः
नापिसुखरूपः सुखस्यानित्यत्वेननित्यात्मस्वरूपत्वानुपपत्तेः तथाचात्मस्वरूपोमोक्षोऽपुरुषार्थएवेत्याशंक्यनेत्या
ह हितत्वप्रयोगादितिहितत्वंपुरुषार्थत्वंतदेतत्प्रेयः पुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरंयदयमात्मेति योवेद

त्त मोक्षस्वरूपएवपरमत्रानंदःविज्ञानमानंदंब्रह्मेत्यादिश्रुतिभिस्तस्यपरमानंदरूपत्वोपदेशात्तस्यचनित्यत्वेपिलोकधर्म
जन्यतत्तदंतःकरणवृत्तिव्यंग्यतयातदुत्पत्तिविनाकोपचारः अज्ञानव्यवहितस्यचतस्यअप्राप्तस्यज्ञानमात्रादविद्यानिव
त्याप्राप्तिरिवभवतीतितदुद्देशेनमुमुक्षूप्रवृत्त्युपपत्तिः अध्यस्तस्यप्रपंचस्यदुःखरूपस्याधिष्ठानत्वात्सएवाभावइतिदुः
खाभावरूपत्वेनापितस्यपुरुषार्थता ननुमोक्षेसुखंसंवेद्यतेनवानाद्यः तदानींदेहेंद्रियाद्यभावेनतव्यंजकाभावात्तव्यं
ग्रकाभावेपितत्संवेदनाभ्युपगमेसंसारदशायामपितथाप्रसंगान्नद्वितीयाः अपुरुषार्थत्वापत्तेः ज्ञायनस्यवतस्यपुरुषा
र्थत्वात् अतएवशर्करात्वद्रोजिनोस्वतिवैभवमन्यानासुद्धारइतिचेन्नेत्याहस्वतस्सिद्धभावादितिस्वप्रकाशज्ञानरूपता
दित्यर्थः यद्यपिसंसारदशायांअविद्यावत्तनरूपत्वात्परमानंदरूपतयानप्रथतेतथातत्वविषयाअविद्यानिवृत्तौस्वप्र
काशतयास्वयमेवपरमानंदरूपेणप्रकाशतेनव्यंजकापेक्षा ननुसुखस्यस्वप्रकाशज्ञानरूपत्वेपिनात्मरूपता ज्ञानस्यधा
त्वर्थरूपतयाक्रियात्वेनसाश्रयत्वात्जानामीतिप्रतीतेः ज्ञानमहास्मीत्यप्रतीतेश्चतथाचवक्ष्यमत्वेनवादइत्याशंक्य

नेत्याह अनन्याश्रयत्वादितिचेत्साक्षादपरोक्षाद्ब्रह्मणोऽयमात्मासर्वान्तरः सत्यंज्ञानमनंतंब्रह्मविज्ञानमानंदइतिश्रुतेः
स्वप्रकाशज्ञानानंदरूपएवेआत्माऽयंतः करणतादात्म्याध्यासेननचतद्वृत्तौज्ञानाध्यासाज्ञानासीतितदाश्रयत्वप्रतीतिः
धात्वर्थत्वंउत्पत्तिविनाशवेचांतः करणवृत्तेनवेतिज्ञप्तिरूपस्यस्वज्ञानस्यसर्वाधिष्ठानत्वेनअन्याश्रयत्वाभावान्नेद्दे
तापत्तिः तेनस्वात्मकआत्मासत्यस्तद्भिन्नंसर्वजगदसत्यमितिसिद्धं ननुसर्वस्यजगतस्तुच्छत्वेननिषेधेनात्मतत्व
प्रतिपत्तिर्नस्यात् नहिशशविषाणंसिध्यतेद्वयनिषेधेनद्वयनिषेध्यतइतिन्यायात् तथाचनिषेधानुपपत्तेर्नजगतस्तु
च्छत्वमितिनेत्याह नचैवंतदन्यद्द्वितीयंकुतस्यान्नवादवलत्वेनचावैवलत्वं नह्यन्येनवारन्यमद्वैतत्वात्कथंस
र्ववेदांतसिद्धंब्रवीमि एकत्वसंख्यायोगिएकंतद्द्वितीयंअपेक्षाबुद्धिजन्याद्विसंख्यायोगेकुतःस्यात् द्वितीयंचत
तीयादीनामित्युपलक्षणंनन्वेकमेवाद्वितीयमितिश्रुत्याएकत्वंप्रतिषाध्यतेनेत्याह नवावैवलत्वंएकत्वंतस्यावि राम०
यत्वंतायद्यात्मानएकत्वंश्रुत्यादिनानप्रतिपाद्यते तर्हिप्रत्यक्षादिप्रमाणवरोधंकथंभवस्यादितिचेन्नेत्याह नच्चा द २६

केवलत्वमितिनेहनानास्तिकिंचनएकमेवाद्वितीयं अथातआदेशोनेतिनेतीति इत्यादिश्रुतिभ्यः तर्हिसर्वप्रति
षेधाच्छून्यमवस्यादितिनेत्याहनशून्यमिति असन्नेवसभवति असद्ब्रह्मेतिवेदचेदस्तिब्रह्मेतिचेद्वेदसंतमे
नंततोविदुरिति सत्यंज्ञानमनंतंब्रह्मसदेवसाम्येवमुग्रआसीदित्यपक्रम्यैवंतदात्म्यमिदंसर्वंतत्सत्यं सआत्मा
तत्वमसित्यादिश्रुतिभिःसत्यत्वप्रतिपादनात् सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च तर्हिसत्यत्वज्ञानत्वादिध
र्मवदपिस्यात्नेत्याहनचाऽन्यमितिरेकमद्वितीयमितिपदद्वयेनसर्वप्रतिषेधप्येवकारेणधर्मधर्मिभावादि भे
दाभेदप्रतिषेधात् सर्वत्रहेतुमाह अद्वैतत्वादितिद्विधेतंद्वितंतस्वभावोद्वैतंतदुक्तंवार्तिके द्विधेतंद्वित्वमित्या
हुस्तद्भावोद्वैतमुच्यतइति नविद्यतेद्वितंद्विधाभावोयत्रतदद्वैतमित्यस्यार्थः सल्लक्षणेक्षद्वैतइतिश्रुतेःप्रति
योगिज्ञानस्यैवबाधेनअभावबुद्धेरकारणत्वात् द्वैतस्यानिर्वचनीयतांगीकारेणप्रत्यक्षादिवेद्यत्वानिषेधोपपः
त्तिरित्यर्थः नह्येतादृशःआत्मेअंगुलिनिर्देशेनप्रतिपाद्यतामितिनेत्याहकथंब्रवीमि किमाक्षेपेअद्वैतत्वेनवागरोष

यत्वात् अनेनैवप्रोक्तान्य यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह नविज्ञातेर्विज्ञातारंविजानीयाइत्यादिश्रुतिऽ
ष्यः वाग्विषयत्ववेदांतानांव्यर्थं तत्रप्रामाण्यानुपपत्तिरितिचदविषयेष्यात्मनितदाकारनिवृत्तिमात्रेणतदविद्यानिव
र्त्तकत्वादित्याह सर्ववेदांतसिद्धमितितथाचश्रुतिः यस्यामतंतस्यमतंमतंयस्यनवेदसः अविज्ञातंविजानतांवि
ज्ञातमविज्ञानतांइतियन्मनसान्मनुते येनाहुर्मनोमतं तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतेइत्यादिविषयत्वंऽ
आत्मनोदर्शयति तदेवंवेदांतवाक्यजन्याखंडाकारवृत्याअविद्यानिवृत्तौतत्कल्पितसकलानर्थनिवृत्तौपरमा
नंदरूपसर्वदुःखनिवृत्योभवतीतिसिद्धं नस्तोमितंव्यासविरोधमर्थसम्यग्ज्ञास्त्रैक्यापिबंधः विनावितैस्तांसिद्धिता
खिलार्थेतंत्रांदरंनोमिस्मरेत्स्वंब्रह्मलब्धुरपिबद्धर्यवहश्चिंतामणिरिवनिबंधायंमधुसूदनेनमुनिनापिवातोयुणिनां
विनोदायग्रंथस्तत्रसोऽयंविंचिन्नुरोरवमनाहि यदत्रसोऽयंविंचिन्मयेइवगुरोनीहि बहुयाचनयामयायामल्पोबल
भद्रस्यकृतकृतानिबंधः यदत्रेमिहास्तियत्रदुष्टंतमसंधियोविक्ष्यंतु ॐश्री ॐ इतिश्रीपरमहंसपरिव्राजऽ

काचार्यश्रीविश्वेश्वरभगवत्पूज्यपादशिष्यश्रीमधुसूदनसरस्वतीविरचितासिद्धांतबिंदुःसमाप्तः ॥श्री॥ ॥
श्लो॥ यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया अबधंवासबधंवाममदोषोनविद्यते ॥ करदंतमपराधंक्षंतुं
महंतुसंतः ॥श्री॥ श्लो॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् मूर्खहस्तेनदातव्यंएवंवदतिपुस्तकं